# श्रीरङ्गनाथ पादुका सहस्रम्

अस्मद्गुरुभ्यो नमः।

कावेरी विरजा सेयं वैकुण्ठं रङ्गमन्दिरम्।
स वासुदेवो रङ्गेशः प्रत्यक्षं परमं पदम्॥
विमानं प्रणवाकारं वेदशृङ्गं महद्भुतम्।
श्रीरङ्गशायी भगवान् प्रणवार्थ प्रकाशकः॥

श्रीरङ्गनायकि समेत श्रीरङ्गनाथ परब्रह्मणे नमः ।
श्रीरङ्गनाथ दिव्यमणि पादुकाभ्यां नमः ।

श्रीमान्वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

## १. पादुका सहस्रम् - प्रस्ताव पद्धतिः (२०)

सन्तः श्रीरङ्ग पृथ्वीश चरणत्राण शेखराः ।
जयन्ति भुवनत्राण पद पङ्कज रेणवः ॥ १.१॥ १॥

भरताय परं नमोऽस्तु तस्मै प्रथमोदाहरणाय भक्तिभाजाम् ।
यदुपज्ञ मशेषतः पृथिव्यां प्रथितो राघव पादुका प्रभावः ॥ १.२॥ २॥

वर्णस्तोमै र्वकुल सुमनो वासना मुद्वहन्तीं
आम्नायानां प्रकृति मपरां संहितां दृष्टवन्तम् ।
पादे नित्य प्रणिहित धियं पादुके रङ्गभर्तुः
त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः ॥ १.३॥ ३॥

दिव्य स्थानात् त्वमिव जगतीं पादुके गाहमाना
पादन्यासं प्रथम मनघा भारती यत्र चक्रे ।
योगक्षेमं सकल जगतां त्वय्यधीनं स जानन्
वाचं दिव्यां दिशतु वसुधा श्रोत्र जन्मा मुनिर्मे ॥ १.४॥ ४॥

नीचेऽपि हन्त मम मूर्धनि निर्विशेषं
तुङ्गेऽपि यन्निविशते निगमोत्तमाङ्गे ।
प्राचेतस प्रभृतिभिः प्रथमोप गीतं
स्तोष्यामि रङ्गपति पादुकयो र्युगं तत् ॥ १.५॥ ५॥

धत्ते मुकुन्द मणि पादुकयो र्निवेशात्
वल्मीक सम्भव गिरां समतां ममोक्तिः ।
गङ्गा प्रवाह पतितस्य कियानिव स्यात्
रथ्योदकस्य यमुना सलिला द्विशेषः ॥ १.६॥ ६॥

विज्ञापयामि किमपि प्रतिपन्न भीतिः

प्रागेव रङ्गपति विभ्रम पादुके त्वाम् ।
व्यङ्क्तुं क्षमाः सदसती विगताभ्य सूयाः
सन्तः स्पृशन्तु सदयै र्हृदयैः स्तुतिं ते ॥ १.७॥ ७॥

अश्रद्दधान मपि नन्वधुना स्वकीये
स्तोत्रे नियोजयसि मां मणिपादुके त्वम् ।
देवः प्रमाणमिह रङ्गपति स्तथात्वे
तस्यैव देवि पदपङ्कजयो र्यथा त्वम् ॥ १.८॥ ८॥

यदाधारं विश्वं गतिरपि च यस्तस्य परमा
तमप्येका धत्से दिशसि च गतिं तस्य रुचिराम् ।
कथं सा कंसारे र्द्रुहिण हर दुर्बोध महिमा
कवीनां क्षुद्राणां त्वमसि मणिपादु स्तुतिपदम् ॥ १.९॥ ९॥

श्रुतप्रज्ञा सम्पन्महित महिमानः कतिकति
स्तुवन्ति त्वां सन्तः श्रुति कुहर कण्डू हरगिरः ।
अहं त्वल्पस्तद्वद्यदिह बहु जल्पामि तदपि
त्वदायत्तं रङ्गक्षिति रमण पादावनि विदुः ॥ १.१०॥ १०॥

यदेष स्तौमि त्वां त्रियुग चरण त्रायिणि ततः
महिम्नः का हानिस्तव मम तु सम्प न्निरवधिः ।
शुना लीढा कामं भवतु सुर सिन्धु र्भगवती

तदेषा किम्भूता स तु सपदि सन्ताप रहितः ॥ १.११॥ ११॥

मितप्रेक्षालाभ क्षण परिण मत्पञ्च षपदा
मदुक्ति स्त्वय्येषा महित कवि संरम्भ विषये ।
न कस्येयं हास्या हरिचरण धात्रि क्षितितले
मुहुर्वात्या धूते मुख पवन विस्फूर्जित मिव ॥ १.१२॥ १२॥

निःसन्देह निजापकर्ष विषयो त्कर्षोऽपि हर्षोदय-
प्रत्यूढ क्रम भक्ति वैभव भव द्वैयात्य वाचालितः ।
रङ्गाधीश पदत्र वर्ण नकृता रम्भै र्निगुम्भै र्गिरां
नर्मास्वादिषु वेङ्कटेश्वर कवि र्नासी रमासीदति ॥ १.१३॥ १३॥

रङ्गक्ष्मापति रत्नपादु भवतीं तुष्टूषतो मे जवात्
जृम्भन्तां भवदीय शिञ्जित सुधा सन्दोह सन्देहदाः ।
श्लाघा घूर्णित चन्द्रशेखर जटा जङ्गाल गङ्गापयः
त्रासादेश विशृङ्खल प्रसरणो त्सिक्ताः स्वयं सूक्तयः॥ १.१४॥ १४॥

हिमवन्नल सेतु मध्य भाजां भरताभ्यर्चित पादुकावतंसः ।
अतपोधन धर्मतः कवीनां अखिलेष्वस्मि मनोरथेष्व बाह्यः ॥ १.१५॥ १५॥

अनिदम्प्रथमस्य शब्दराशेः अपदं रङ्गधुरीण पादुके त्वाम् ।
गतभीति रभिष्टुवन् विमोहात् परिहासेन विनोदयामि नाथम् ॥ १.१६॥१६॥

वृत्तिभि र्बहुविधाभि राश्रिता वेङ्कटेश्वर कवेः सरस्वती ।
अद्य रङ्गपति रत्नपादुके नर्तकीव भवतीं निषेवताम् ॥ १.१७॥ १७॥

अपार करुणाम्बुधे स्तव खलु प्रसादा दहं
विधातुमपि शक्नुयां शतसहस्रिकां संहिताम् ।
तथापि हरिपादुके तव गुणौघ लेशस्थितेः
उदाहृतिरियं भवेदिति मिताऽपि युक्ता स्तुतिः ॥ १.१८॥ १८॥

अनुकृत निजनादां सूक्ति मापादयन्ती
मनसि वचसि च त्वं सावधाना मम स्याः ।
निशमयति यथाऽसौ निद्रया दूरमुक्तः
परिषदि सह लक्ष्म्या पादुके रङ्गनाथः ॥ १.१९॥ १९॥

त्वयि विहिता स्तुतिरेषा पदरक्षिणि भवति रङ्गनाथपदे ।
तदुपरि कृता सपर्या नमतामिव नाकिनां शिरसि ॥ १.२०॥ २०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
प्रस्ताव पद्धतिः प्रथमा ॥